International Journal of Sanskrit Research 2020; 6(1): 75-77

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(1): 75-77
© 2020 IJSR
www.anantaajournal.com
Received: 05-01-2020
Accepted: 06-02-2020

**डॉ. सौम्य रञ्जन महापात्र**
संस्कृताध्यापकः संस्कृत, ढेंकानाल महिला महाविद्यालय, ढेंकानाल, ओडिशा, भारत।

**Corresponding Author:**
**डॉ. सौम्य रञ्जन महापात्र**
संस्कृताध्यापकः संस्कृत, ढेंकानाल महिला महाविद्यालय, ढेंकानाल, ओडिशा, भारत।

# अलङ्कारलक्षणम्

## डॉ. सौम्य रञ्जन महापात्र

**प्रस्तावना**

काव्ये शब्दार्थौ समलङ्क्रियेते अनेन इति अलङ्कारव्युत्पत्त्या शब्दाश्रितः शब्दालङ्कारः तथा अर्थाश्रितः अर्थालङ्कारः। अलङ्करणमलङ्कारः इति भाव व्युत्पत्त्या काव्यशास्त्रपर्यायोऽलङ्कारः। तत्र प्रथमव्युत्पत्त्या निष्पन्नस्य अलङ्कारस्य लक्षणं सर्वप्रथमं दण्डिना कृतम्। यथा –

**काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते।**
**ते चाद्यपि विकल्प्यन्ते क स्तां कात्स्यँ वर्त्सति॥ काव्यादर्श- 2/1**

तदनुसारं काव्यशोभायाः कर्त्तारः अलङ्काराः काव्यशास्त्रे प्राधान्येन अङ्गीक्रियन्ते।
रसगङ्गाधरकारः आचार्यः पण्डितराजजगन्नाथमतानुसारं सर्वोऽपि ध्वनिप्रपञ्चः पर्यायोक्तालङ्कारकुक्षौ निक्षिप्तः इति स्वीक्रियते। यथा –

**अपरञ्च सर्वोऽपि व्यङ्ग्यप्रपञ्चः प्रर्यायोक्तकुक्षौ निक्षिप्तः।**
**ध्वन्यादिशब्दैः परं व्यवहारो न कृतः॥ रसगङ्गाधरः**

एवं च प्रतापरूद्रयशोभूषणे अलङ्कारप्रकरणे विद्यानाथेन इत्थं प्रतिपादितम् –

**अलङ्क्रियते अनेनेति चारुत्वहेतुरलङ्कारः।**
**यथा करचरणाद्यवयवगतैर्वलयनूपुरादिभिस्तदलङ्कारतया प्रसिद्धैरवयवावी एवालङ्क्रियते तदा शब्दार्थावयवगतैरनुप्रासोपमादिभिस्तति तदलङ्कारतया प्रसिद्धैरवयवीभूतं काव्यमुपस्क्रियते। प्र.रू.य.भू. – अलं. प्रक.पृ.336**

आचार्यवामनोऽपि काव्यालङ्कारसूत्रवृतौ काव्यस्य स्वरूपाधायकं तत्त्वमलङ्कारमिति अलङ्कारविषये स्वीयमतं सूत्रितम्। यथा –

**सौन्दर्यमलङ्कारःए काव्यं ग्राह्यमलङ्कारात्ए ए अलङअकृतिरलङ्कारः॥**
**का.सू- 1/1/1-2**

अस्य मते काव्यस्य शोभायाः कर्तारधर्माः गुणाः भवन्ति। तदतिशयहेतवः अलङ्काराः इति। अतः काव्यस्य शोभाभिवर्धकाः अलङ्काराः इति प्रतिपादयन् गुणालङ्कारयोर्मध्ये भेदं प्रतिपादयति।
गुणविरहिते काव्ये अलङ्काराणां सौन्दर्यं न भवितुमर्हति इति आचार्यवामनमतानुसरन् आचार्य इन्दुराजः स्वीय काव्यालङ्कारसारसंग्रहटीकायां इत्थ सूचयति –

**यदि भवति वयश्च्युतगुणेभ्योए**
**वपुरिव यौवनबन्ध अङ्गनायाः।**
**अपिजनदयितानि दुर्भगत्वं**
**नियतमलङ्कारणानि संश्रयन्ते॥**

तथैव आचार्यभामहादि आलङ्कारिकाः सौन्दर्यशास्त्रस्य प्रारम्भिकपर्याये काव्ये अलङ्कारस्य सर्वाधिकमहत्वमुद्घोषितवन्तः। तदुक्तं –

**न कान्तमपि निर्भूषं विभाति वनिताननम्। भा.का – 1/39**

आचार्यभामहस्य सिद्धान्तोऽयं समर्थयन् प्रथमवाग्भटः स्वाभिमतं इत्थं प्रतिपादितम्। यथा –

**दोषैर्मुक्त गुणैर्युक्तमपि येनोज्झितं वचः।**
**स्त्रीरूपमिव नो भाति तं ब्रुवेऽलङ्क्रियोऽचचयम्॥ वाग्भट. अ – 4/1**

किञ्च वहूना, ध्वनिवादीनामाचार्याणां मते काव्यशोभासम्पादनार्थं अलङ्कारसन्निवेशनविधि अपेक्षते। तदुक्तं राजानकः आनन्दवर्धनेन ध्वन्यालोके –

**तमर्थमवलम्बन्ते येऽङ्गिनं ते गुणाः स्मृताः।**
**अङ्गाश्रितास्वलङ्काराः मन्तव्याः कटकादिवत्।**

अयं आचार्यः भामहस्य मतं समर्थयन् वदति –

**यतः प्रथमं तावदतिशयोक्तिगर्भा सर्वालङ्कारेषु शक्यक्रिया कृतैव च सा महाकविभिः कामपि काव्यच्छविं पुष्यतीति कथं ह्यतिशययोगिता स्वविषयऔचित्येन क्रियमाणा सती काव्ये नोत्कर्षमलहेत्। ध्व.लो – 3/37**

अनेन अलङ्कारस्य विषयः व्यापकः भवति।
तथैव सरस्वतीकण्ठाभरण-रत्नदर्पणकारः रत्नेश्वरमिश्रमतेन –

**शोभानिर्वृतिहेतुर्विच्छित्तिरलङ्कारः इत्येव अलङ्कारस्य लक्षणम्। 3/1।**

तत्र शोभाकर शब्दस्थाने हेतु पदं प्रयुज्य अलङ्कारस्य प्राधान्यं न स्वीकृतम्,उक्तिविच्छित्तिरेवलङ्कारः इति प्रतिपादितम्। वैचित्र्यमलङ्कारः इत्यपि प्राचां मतम् वर्तते। सं.सा.इ – पृ.196।
तेन चमत्कारोत्पादकमेवालङ्कारः इति व्यापकं लक्षणमायाति। परवर्तिभिः आचार्यैः काव्ये अलङ्कारः शोभावर्धकः एव कथितः। न तु शोभाकारकः। तेन अस्य व्यापकता अल्पीकृता भवति। काव्यप्रकाशकारः वाग्देवतावतारः आचार्यमम्मटेन अलङ्कारस्य लक्षणमित्थं प्रतिपादितम् –

**उपकुर्वन्ति तं सन्तं ये अङ्गद्वारेण जातुचित्।**
**हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥ का.प्र – 8/2**

अत्र हारादिवदलङ्कारा इत्येव लक्षणं भवति, अन्यास्तु स्वभावकथनपरम्। जातुचिदिति कथनेन तस्य उपलक्षणता स्वतः सिद्धाः भवति। इदमलङ्कारलक्षणं गुणनिरुपणप्रसङ्गे गुणालङ्कारयोः पार्थक्यप्रदर्शनायोक्तम्। तत्र पूर्वार्धे अलङ्काराणां परम्परया (शब्दार्थशोभासम्पादनद्वारा) रसोपकारकत्वं, तदपि न नियतरूपेण इत्युक्तम्। तेन साक्षान्नियतरसोपकारकगुणेभ्यः अलङ्काराणां पार्थक्यं सूचितं भवति। उत्तरार्धेन अलङ्कारलक्षणं भेदपुरस्सरं लक्षितम्। तस्य अयं भावः यथा – ***कण्ठादि अङ्गोत्कर्षद्वारेण शरीरिणः अपि उपकारकाः हारादयः अलङ्काराः लोके भूषणशब्देन कथिताः तथैव साहित्यशास्त्रे काव्ये शब्दार्थोत्कर्षद्वारेण रसस्यापि उपकारकाः अनुप्रासोपमादयः अलङ्काराः प्रथन्ते। यत्र रसोपकारसम्भवः तत्र उपकुर्वन्ति, यत्र च न सम्भवः तत्र उक्तिवैचित्र्यमात्रपर्यवसायिनः भवन्ति, यथा हारादयः सुन्दर्याः अङ्गानामुत्कर्षकाः, कुरूपायाश्च दृष्टिवैचित्र्याय एव इति। का.प्र – झलकीकरटीका – पृ. 465।***

अर्थात् यः धर्मः काव्यस्य शब्दार्थरूपेण शरीरेण तमङ्गीनं रसमुपकुर्वन्ति ते अलङ्काराः इत्युच्यन्ते। यथा नायिका स्वहस्तपादादौ कटकनूपुरादिकं परिदधाति तथैव काव्यनायिकायाऽपि स्वशब्दार्थशरीरे अनुप्रसोपमादीन् अलङ्कारान् परिदधाति।
ततश्च गुणातिरिक्ताः काव्यशोभातिशायिनः अलङ्काराः इत्येव निर्दृष्टं लक्षणं सर्वबोधजनकञ्च। एवमेव दर्पणकारः आचार्यः कविराजविश्वनाथोऽपि अलङ्कारस्वरूपं परामृशति। तद्यथा –

**शब्दार्थयोरस्थिराः ये धर्माः शोभातिशायिनः।**
**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गादिनवत्॥ सा.द – 10/1**

अत्रापि शोभातिशायिनः धर्माः अङ्गादिवदलङ्काराः इत्येव मुख्यतः लक्षणम्। अस्थिरत्वेन रसोपकारकत्वमिति गुणात् पार्थक्यवोधकमेव।
अत्र पदार्थज्ञानिनः नैयायिकादयः स्वशास्त्रीयं काठिन्यं साहित्येऽमलेऽपि निक्षिपन्ति, तत् सूक्ष्मतायाश्च साहित्यं दूरीकृत्य स्वनिर्मितं लक्षणमपि कलुषितं कुर्वन्ति। तथाहि – काव्यप्रकाशीयमलङ्कारलक्षणं तैः इत्थं परिष्क्रियते। काव्यप्रकाशस्य बालवोधिनीव्याख्याने यथा – ***रसोपकारकत्वे सति रसावृत्तित्वम्, तथात्वे सति रसानियतस्थितिकत्वम्, अनियमेन रसोपकारकत्वं वेति त्रितयमलङ्कारत्वम्। तदेतत् क्रमेण कामिन्यां कमले कलशे चातिव्याप्तम्।***
***सा.द हरिदासी टीका – पृ 474***

तथाहि कामिनी श्रृङ्गाररसस्य आलम्बनविभावभूतापि गुणवत्तद्धर्माभावात् तदवृत्तिरिति। एवं कमलमुद्दीपनविभावभूतमपि रसाभाववति जलादौ विद्यत इति रसेन सह तस्य अनियतस्थितिकत्वम्। कलशोऽपि कुचस्मारकतया कदाचिदेव श्रृङ्गारमुकरोतीति। न च समुदितं त्रितयमप्येकमेव लक्षणमिति विचारेणापि निस्तारः कामिन्यादौ अतिव्याप्तिा अवस्थ्यात्।
कुवलयानन्दचन्द्रिकायामपि निर्दुष्टालङ्कारलक्षणमुपन्यस्तम्। ***यथा– अलङ्कारत्वञ्च रसादिभिन्नव्यङ्ग्यभिन्नत्वे सति शब्दार्थान्यतरनिष्ठा या विषयितासम्बन्धावच्छिन्ना चमत्कृतिजनकता तदवच्छेदकत्वम्।***

एतन्मते वाच्य-लक्ष्ययोः एव अलङ्कारता। व्यङ्ग्यार्थे रसवदादीनामेव अलङ्कारता। उपमादीनां व्यङ्ग्यत्वदशायां तत्प्राधान्ये अलङ्कारध्वनिः, अप्राधान्ये तु वस्तुमात्रम्। एतल्लक्षणस्यापि पूर्वोक्त कामिनी-कमल-कलसादिषु अतिव्याप्तिः। तथाहि – अर्थसामान्यत्वेन कामिन्यादौ सति अन्तं दलं संघटत एव, अपरं दलमपि तथैव। अर्थविशेषरूपः कामिन्यादिः सामान्येन ज्ञातः सन् आनन्दकरो रसिकानाम्। किञ्च रसोपकारत्वप्रतिपादनमपि अलङ्काराणां न विचारसहम्, अर्थादिद्वारा तथा प्रतिपादने तु अर्थादिरेव साक्षात् रसोपकारकत्वे अलङ्काराणां कुलालपित्रादिवत्, अन्यथा सिद्धत्वम्।
एवमेव अन्यैरपि आचार्यैः निर्दुष्टमलङ्कारलक्षणं स्वीयं वाग्वैचित्रेण चित्रितम्। तत्र पण्डितमधुसूदनशास्त्रिमहोदयैः स्वीय रसगङ्गाधरग्रन्थस्य भूमिकायाम् अलङ्कारस्य निर्दुष्टलक्षणमित्थं प्रस्तावितम्। यथा – ***अपराङ्गीभूत-रसभावादिभिन्न-व्यङ्ग्यभिन्नत्वे सति अनुप्रासोऽपमादिविशिष्ट शब्दार्थान्यतरनिष्ठसमवायसम्बन्धावच्छिन्नचमत्कारनिष्ठकार्यतानिरूपितसमवायसम्बन्धावच्छिन्नतादृशज्ञाननिष्ठकारणतानिरूपितविषयितासम्बन्धाच्छिन्नावच्छेदकतानिरूपतालङ्कारीयस्वरूपसम्बन्धावच्छिन्नावच्छेदकत्वम् अलङ्कारत्वमिति।***

अन्यः वक्तव्यम् – अलङ्कारलक्षणे उद्देश्यतया अलङ्कारशब्दप्रयोगः नोचितः। तद्विशेषाणामनुप्रासोपमादीनाम् उल्लेखस्तु सुतराम् असङ्गतः। किञ्च स्वशास्त्रीयाचार्यणां लक्षणानुसारि सुबोधलक्षणप्रदर्शनमेव पाण्डित्यमुपयोगि च।
पण्डितमधुसूदनशास्त्रिभिः काव्यप्रकाशीयलक्षणे **उपकुर्वन्तीति** अशुद्धम्, **उपस्कुर्वन्तीति** वाच्यम् भूषणार्थे सुपोऽनिवार्यत्वात् इत्युक्तम्, तन्न तस्य उत्कर्षयन्तीत्यर्थात्, भूषणार्थविवक्षाभावात्।

काव्यप्रकाशप्रदीपिकायां तु आचार्य रामगोविन्दशुक्लैः मम्मटानुसारी अलङ्कारलक्षणमित्थं प्रदर्शितम् –
***साक्षात् परम्परया वा रसाद्युत्कर्षजनकत्वे सति शोभातिशायिककाव्यधर्मत्वमलङ्कारत्वम् । रसवदाद्यलङ्काराणां स्वरूपसम्बन्धेन अनुप्रासोपमादीनां परस्परासम्बन्धेन रसभावाद्युत्कर्षजनकत्वम्।***

व्यङ्गोपमादिवारणाय तत्तदलङ्कारलक्षणे प्रस्फुटः, वाच्यमित्यादिपदनिवेशः कृतो मान्यैः काव्यशास्त्रीय आचार्यैः । प्राचीनैस्तु व्यङ्ग्यभिन्नत्व निवेशः न क्रियते । व्यापकरूपेण एव अलङ्कारस्य क्षेत्रं स्वीक्रियते।
एवमेव अलङ्कारस्य महती व्यापकता प्रकाशिता । अन्ततोगत्वा एवं ज्ञायते यत्, व्यङ्ग्यव्यतिरिक्तः सर्वेऽपि चमत्काराः अलङ्काराधीनाः एव भवन्ति।

**संदर्भः**


1. काव्यादर्शः – चौखम्बा सुरभारती, वारणसी
2. काव्यालङ्कारसूत्रवृत्तिः – चौखम्बा सुरभारती, वाराणसी
3. संस्कृतवाङ्मय का वृहत् इतिहास – बलदेव उपाध्याय
4. काव्यप्रकाशः – वामन झलकीकरटीका
5. काव्यप्रकाशः – प्रदीपिका
6. काव्यप्रकाशः – नागेशटीका
7. साहित्यदर्पणम् – दूर्गाप्रसादद्विवेदी
8. साहित्यदर्पणम् - लक्ष्मीटीका
9. रसगङ्गाधरः – मधुसूदनीव्याख्या
10. संस्कृतवाङ्मयान्तः प्रवेशिका – डॉ.सोमनाथदाशः